A. no. 34

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशाय नमः ॥ ॥ तत्राथ … ये हि सिंहव … यन्नादतः पलायंते भ … नोऽमे च्छो जे … ॥
मर्यादाः स्तुमः सुतान् ॥ विष्णुः पार्थ इव खिले रूपे परित्यै … पुन मे स्थितं ॥१॥ अथ षष्ठ एकोनविंशत्याध्यायैः पोषणा सुष्ठुतो ॥ अतिलंघितमर्यादा
… ग लेहतां ॥३॥ अजामिलो मनुष्ये पु महापापोयथाविनं ॥ विष्णुरूपादि घाती च यथा देवैः पुनः सम्भवः ॥४॥ अजामिलस्त्वलकादि
… पितं ॥ संकेतलभगवन्नामभवत्रास्येहां तु पंगजं ॥५॥ इंद्रोपि लगवद्रूपाः स्त्रष्टोनोपेंद्र मे वकांतिं दैवीन सुरे श्वर्य्य शत्रुनिर्जयजीवितं ॥ ॥६॥ तत
… त्रिलिख्याये रजामिलकथोक्ता ॥ विष्णु रूप कथा प्रदि … रिंद्रदोषोक्तये ततः ॥७॥ इंद्रश्चैव तु दोषो नैव स्वाख्यानं ततोऽपष्टि

द्वितीये … यथावते

… र्जो वा त्र ॥ ॥ निवृत्तिमार्गः कथितः आ … दौ भगवता यथा । क्रममयोगोपलब्धेन ब्रह्मणा यद

… संसृतिः ॥१॥ प्रवृत्तिलक्षणश्चैव त्रैगुण्य … विभयोऽभनो यो स्वं लीन प्रकृतेर्गुणो मर्गः पुनर्भव … नः ॥१॥

मार्गः १ … त्वये हे १ … प्रवृत्तिमार्गः २ … पुनः १

परिहितः २ ॥ तत्वरूपा ॥ दि १

… ह्रात्यां च मरुदाख्यानमेवं प्रकरणक्रमः ॥ ॥ नात्र दोषप्रथ … मेवं स्तो इतिः पातकिमोचनो ॥ तंत्यापरख्यापनायोक्तं या स्मे दुर्म्मा
दे लक्षणं ॥ ॥ अथ षष्ठस्कंधो व्याख्यायते ॥ स्वर्वोत्का त्रुवादः स्वकं नरकपरिहारोपायं प्रस्तौति ॥ निवृत्तिमार्गः इति षड्भिः ॥ आदौ द्वितीय
… वैश्वानरं चार्चीत्यादिना भगवता त्वया यथा यथा वर्त्तयेत येन मार्गेण क्रमेण योगी र्द्धिर्गदिशा सितेनो पलब्धो ब्रह्मा तेन महा र संसृतिम्मी
… वति ॥ ब्रह्मणा महते मर्वे संज्ञा मे भवति मंचरे ॥ पुरस्यांते कृतात्मानः प्रविशंति परं पदमिति वचनात् ॥ ॥ त्रैगुण्ये स्वर्गादि सुखं तदेव विषयः प्राप्य
… नलीनाः प्रकृति र्व्युत्थत … र्णं मार्गः लोकाय देहारेल रूपो मार्गः स च कथितः त्वनी यो दक्षिणेन पथा र्य्यमाः पितृलोकं व्रजं नीत्यादिना ॥ ॥ ॥

निरं … ४ … दि मार्गः २ शुक्लो … २ … रुपाः

...वतः केवलानुभवरूपतेन स्वाद्यादिकर्तृत्वं चेत्तु मयं न विकल्पमेतद्यथा ३ नगवान्ते...

...गौडादेवमन्त्रः

...वांतरमाङ्गः अथ तत्रे ति ग्रंथे हृदेव दत्तो यहादिनिर्मीयतां तत्र वस्तांशभूतान्युभयोः फलभूयादत्तो एवंतन्नवस्तुत्वस्वरूपा-
...भूयाद्दातीति हामसंजनस्योपलब्धादर्शनं विद्धकिर्यश्यम न वाङ्दात्तदमीनः मात्ति तया वर्तत इति । तदेवं विरोधेन तु-
...प्रकारमाङ्गः । नहीति विरुध्यत इति विरोधः उत्तयं न वित्तद्धमित्यर्थः । न ह्यस्य दृष्टीत्तेन त्वयि विकल्पोद्भुजातेऽतर्कैश्वर्यवि-
...त्युपपाणाय अतस्मिन्नीष्ठरेश्वत्वेन श्रवणाद्यमतर्कमाहात्म्यं यश्यतस्मिन्नौ विकल्प एवं वा एवं वेति वितर्कः किमयं...

...भवतीति केवलानुभवरूपतं स्वप्नादिकर्तृत्वं चेत्तु नयं न विकल्पमेते ॥ २ ॥ ॥

अथांतं त्र न वा किंदेवं दत्त वदिहैषणाविसर्गयतितः पारं तं श्रेणावक्ता त्तकुशलाकुशलफलमुपाददाति ॥ ३४ ॥
उपशमशीलाः समंजसदर्शन उदासत इति ह वावन विदामः ॥ ३५ ॥ नहि विरोध उभयं लगावत्यपरिगणितगुणगणे-
माहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतः करणाश्रयदुरवग्रहवादिनां
विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामंतर्धायको न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात्समविषम-
मगमिायथा रज्जुखंडः सर्पादिधियां ॥ ३७ ॥ ॥

...नुमामामाः तदन्नु याहकाणार्कर्षिद्धार्वाचीना वस्तात्स्वरूपासंस्पर्शिनो ये विकल्पादयस्तैरुशास्त्रेरुतैः कलिलं व्याकुलं यदंतःक-
...हसातेन वादिनां विवादस्थानं न समरेरगोचरो न उपलक्षणामात्र मेतत् उपलक्षितस्यातीतत्राह उपरतो मायामयः संसारो यस्मिन् तस्मिन्केव-
...लेऽस्मिन्नात्मनि मायया कोऽन्वर्थः कर्तृत्वादिर्भवति यदि कस्मात्तः कर्तृत्वादिलेवे त्त हि विरोधः स्यात्तेनद्वृत्तदृष्टीत्याङ्गः स्वरूपद्वयाभावादिति उभय-
...त्ति तेन तव मायया त्वं विषयीकृतं भाङ्गः । समाविषमा च मतिर्येषां तेषां मतमलिशायां सर्पादिविषयाभियायमा यथा रज्जुखंड-
...तातमेवं स्वितिकोयं ३३४ मतिनिदेन दर्शयति सम विषमेति ॥ ३७ ॥ ॥

...माया मय संसारे केवले स्वप्नादिकर्तृत्वे विरोध... कर्तृत्वमीकारे...

...नमलः केवले लकर्तृत्वं स्वरूप स्वस्वरूप द्वयाभावात् ॥ केवलानुभवरूप...
...नयकनग वतो नव लै द्वातकेर्य प्रत्यक्ष... लोऽस्य चैतन्यं शक्तित्वोऽद्वैति भावः ॥
...तदा रज्जुखंडः सर्पादिवद्भाति ॥ ... रज्जुरिति रज्जुर्द्वयं करोति रज्जुखंडो रज्जुखंड एव भाति ॥
...॥ यदि ... नवरूपं ... मति करोति तदा केवलज्ञान रूप ...
...तदैकत्वं ... केवलज्ञान ... विरोधः ॥ ... ततः ... भवति ...

...an eGangotri Vaidika Bharata Initiative

...२ स्वे पर ज्ञातउ

...व परिहृत्य निश्चितं परमार्थमो... मणवाह्यो नानारूपेणाशतीतः वस्तुस्वरूपमस्वरूपमर्थेषां गुणानां विषयाणामात्मा...
...नेत्युक्तौ जीवात्मोपलक्ष्यते। सर्वं प्रत्यगात्म...त्वात्सर्वं जीवांतर्यामित्वात्। जडानामात्मत्वाद्यभावेन जीवस्यापि जडत्वापत्तेर्न...
...वेदः पर्यवशेषितः। नेति नेतीत्यादिश्रुतिभिः। अत एव भक्तिरेव परमपुरुषार्थ इत्याद्युक्तमथ हेति पर्यावर्तन्ते इत्यर्थः...
...थ ह वा वं अत एव हि हे स्मरमथन परमस्य भगवतः एते त्वत्पदं सो जानीमेवं कथं सुकृ स्मृतिं प्रविशंतीत्यर्थः। हि यस्मात्स्वार्थे...

प्रेमादि। विं५ मात्रे ए२ ... स्वादितयार विबकाणां...

...यं वहितु नः सर्वं च स्मानिवसास्वरूपं सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणा...
...पकं एव पर्यवशेषितः॥३०॥ अथ ह वा व तव महिमा स्तनरसमसुडविलुप्तासस्वादवलीदयास्वमनमिनिस्यंदं...
...स्तु वेन न विस्मारितदृष्टश्रुतविषयसुखलेशाना मां परमभागवतानां कोतिनो भगवति सर्वथा प्रियसुहृदि स...
...निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन तव नः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणां...

भक्ताः रागादिरहिताः१

...त्वेन यं त्वेतुन गयं संसारपर्यावर्तन्ते॥३०॥ ॥

जागरिताः१

...ठनिपुणाः अत्यात्मात्वमेव प्रियः सुहृच्च येषां ते। साधवो रागादिरहिताः ... हे अं. तव महिमैव अमृतरससमुद्रः तस्य विप्रु...
...लीदया आस्वादितया स्वमनसि निस्यंदमानं अतिशयेन स्वरयन्निरंतरं सुखं तेन न विस्मारिता दृष्टश्रुतविषयाः सुखलेश...
...वयि नितरां निरंतरं निर्वृतं च मनो येषां ते पुनर्यस्यामेवायां सत्यां॥३०॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri Initiative

चतुःफलो श्लोकश्लोको चतुः भगवतः४ चतुः

...वीर्य्यश्रमगादिफलजननाय समामर्थ्याय श्रुत स्मेन नमः। विश्वमेव तत्तत्फलपरिच्छेदक कालात्मने तत्तद्विघातके भेदे...
...तः प्रलावेः प्रभु उत्कृतये शो लनवक्तु नामेः॥ ३२॥ न भम मम युगातीतं तत्त्वं पंविहाय गुणापाधिकं यज्ञवीर्यविदिकि... ...
...उन्निर्यं भत्रिगुणात्मिकानां तिस्रुणां गवीनां परमे पदं निर्गुणं ब्रह्म पंत शविमगत्या ब्रवीनः इदानीं तु नः हे यातः वे... ...अतः कोप...
...मिता त्वं गणपद्धेन नमो यें तेह रेर्गुणाः अपिपद्धेन वद्यंतः स दोगत्वेनवत्तु भः। नत्त्व उद्देकेण वद्भुयामंवो भयंतोड्दुर्जे... वड पंच यैर्जि लगवन्निता...

भ्रं चतुर्नम्प्रो ... त्तेनप सत्नमो

नमस देवाः जुतुः॥ ॥ नमस्ते युज्ञवीर्याय वयसे उत ते नमः। नमस्ते स्त वक्त्राय नमः स्तु उरु कृतये॥ ३१॥ यन्नैमाती नोतिष्ठेणामी शित्तः पर
मंपदं नोर्वचीनो विसर्गस्य धातवेर्दर्तुमर्हतीति॥ ३१॥ ॐ नमस्ते भगवन्नारायणवासुदेवादि उरुषमहापुरुष महानुभाव परम
मंगलपरमकल्याण परम कारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंस परिव्राजकैः परमेणात्मयो
गसमाधिना परिभावित परिस्फुट पारमहंस्य धर्म्मेणोद्घाटित तमः कपाट द्वारे चित्ते ऽपावृत आत्मलोके स्वयमुपलब्ध निज सुखानु
भवो भवान्॥ ३२॥ ...रखवदाव... विहारयोगो यदशरणः शरीरमिदमनवेक्षितास्मत्समवायं आत्मनैवाविक्रियमाणेन सगुणा

कीडायोगः १ यतः ... विश्व ... मगुणाः सृजसि पासि हरसि॥ ३३॥ ॥

...नर्तु कमिर

...ो धर्म्मो यस्मिन्न आत्मयोगेनाष्टांगेन यः समाधिस्त्रिनैकाग्र्यं तेन परिभाविताः शुशीलिताः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं
...कपाटं यस्मिन् द्वारं ... तेविचित्ते ऽपावृते प्रकटे आत्मलोके प्रत्यक्षरूपे स्वयमेवोपलब्धमात्रि ... निजसुखेतदनुभवस्वरूपोऽपि भवान्॥ ३२॥ न तु केवला
...मम सृष्ट्यादिकर्तृत्वं कथं तत्राह। ... वा यं विहारयोगः क्रीडायोगः ... अशरणो निराश्रयः इदं विश्वमनवेक्षितो इत्यादि सम
...योमेलनं सहायं येन सः॥ ३३॥ ॥ अ १

देव: १ व

...गवन् हे पर... ...वत तुभ्यं नमोस्तु॥ हे परममंगल पुरुषधर्मिक परमहंसपरिव्राजकैः ... तेन ... तज्ञात पदु गवदुजनं तेनो ...
...यमेव प्रकटीकृत यत्रि ... तदनुभवस्वरूपो ... भवति॥ २॥ भगवन् तवायं क्रीडायोगः ... विधः॥ पस्मा...
...उत्पत्तं उद्देविश्वं सगुणं सृजसि पासि हरसि॥ ३॥ ॥

CC-0. Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

...तिव स्रष्टा: पालिता च वं ब्रह्मेशा: अतस्त्वमेव शरणं व्रजामेत्याहु:। यएक इति त्रिभि:। येनानुगृहीता: संतो विश्वं सृजाम न तु स्वयमेवं ध्यातुं नाथोत्थ
याहृको स्थित श्च दर्शनात्तत्रा हुः स्यमस्मत्तः पुरः स्वर्ग मेवां तस्मात्मितया ममीहमानश्चापि यस्य लिंगं रूपं न पश्याम: तत्र हेतुः पृथगीशमानिन्य
नो देवादिषु स्वपंडुपरश्च आममत्स्यरामादितनुभि: कृतावतारस्तन्न आत्ममात्स्कृत्वा पातिवाआत्मस्वतंदेवतं अतः विश्वं विश्वात्मकं तथापि विकारं

य एक ईशो निजमायया न: ससर्ज येनानुसृजाम विश्वं। वयं न यस्यापि पुर: समीहत: पश्याम लिंगं पृथगीशमानिन:॥२५॥
यो न: स्वपक्षेषु सुरेश सर्गमाना स्वदेवर्षितिर्यङ्नृषु नित्य एवा कृतावतारस्तनुभि: स्वमायया कृतात्मसात्पीतिस्तु योगेभ्यो वो॥२६॥
तमेव देवा वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यं। व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा॥२७॥ ॥
श्रीशुक उवाच॥ ॥इति तेषां महाराज सुराणामुपतिष्ठतां। प्रतीच्यां दिश्यभूदावि: शंखचक्रगदाधर:॥२८॥ आत्मतुल्यै: षो
डशभिर्विना श्रीवत्सकौस्तुभौ। पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं॥२९॥ दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवा: दंडव
त्पतिता राजन्शनैरुत्थाय तुष्टुवु:॥३०॥ ॥ विकसितकमलनेत्रे

...वास्यति अद्य यथ्यं विश्वात्मने हेतु: परं कारणं न तु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः प्रधाने तु अस्मं वेदात्मकोपि मम ... सएव न: शं वि धास्य...
...शिवादित्थमममा विश्वस्तत्र पुनश्च तं योगेदृष्ट्वा ईक्षणाह्लादेन विक्लवा अवनौ दंडवत्पतिता: संत: शनैरुत्थाय तुष्टुवु: ... त श्रीव...
...आत्मतुल्यैः षोडशभि: सुनंदादिभि: परित: सेवितं उन्निद्रशरदंबुरुहवदीक्षणे यस्य तं॥२९॥ ॥

नेता: पमापर मीता:१ यम:

धादीनि पंच महाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयस्ततोर्वाचीना वयं च सर्वे यस्मै अंतकाय कालाय उद्विजंतो संतो बलिं हराम अत्रसो ऽपि
स्मा हि तेति ततः परमेश्वरादेव नोऽस्माकं अरणं शरणं रक्षा न क्षा तत एवेत्यवधारणो हेतुमाह। अविस्मितं निरहंकारं अकुतूहलत्वं वा। अतः शांतं रागादिर
हितं स्वज्ञाता: स्वेनैव लाभेन परिपूर्णकामं तत्वज्ञाता: समं गुणाधिपरि छेदश्चेदेवं भूतं परमेश्वरं विना अपरं यः शरणार्थं उपसर्पति स हि बालिशो ऽज्ञः सूत्रो मे ऽस्तुनो
पुच्छेन समुद्रमतितितर्ति अतितर्तुमिच्छतीत्यर्थः। यथा तेन मंदबुद्धिना रणं न लभते तथा निरीश्वरं आश्रयेण श्रमं न भवतारणं न लभतीति। लोवा महा लये स एव वरत्नक

स्वलांगूलेन कृविं २० विर्मिता:१ गध्ध्ति २ ऽ:यवा १ कारं

देवान्कृतघ्नः॥ ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः। हराम यस्मै बलिमंतकोऽसौ बिभेति यस्मादरणं ततो नः॥
२१॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं। विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्ति सिंधुं॥ २२॥ यस्यो
रुशृंगे जगतीं स्वनावं मनुर्यथाबध्य ततार दुर्गं। स एव नस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वारिचरोऽपि नूनं॥ २३॥ पुरा स्वयंभूर
पि संयमांभस्युदीर्णवातोर्मिरवैः करालेः। एकोऽरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः॥ २४॥ ॥

प्रलयोदके मत्स्य ऊर्मि पद्मात् कमलात् पारक:१

दृष्टमित्याह उदर्शान्तो। यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बध्वा मनुः सत्यव्रतो यथावद्दुर्गं संकटं ततार स एव वारिचरो मत्स्यस्त्वाष्ट्रनिष्ठनोऽस्मानन्याश्रितान्मत्तः
त्राता तारयिष्यति। संयमांभसि प्रलयोदके उदीर्णैः रुद्धैः वातैरुत्थिता ये ऊर्मयस्तेषां रवैः करालेऽनेकः अरविंदात्पद्मात् लिक कमलात्पतितः प्राय एक असहाय एव तस्माद्
याद्येन ततार स एव नः पारः पारको ऽस्तु॥ २४॥ ॥

रम
32

ये त्रस्ता लोकाः दश दिशो विदुद्रुवुरिति पंचमेनान्वयः कथंभूतं विश्वरूपमेतत तत्र भुवि वृद्धिमाप्तं प्रतिदिनं वर्द्धमानं ॥ २३ ॥ दग्धशैलस्थलीकाशं दं-
ष्ट्राश्रानीकवहुद्धो दीप्तिपर्युष्यितां तमसताम्रवह्निरवाः श्मश्रूणि वयस्थं मध्याह्नार्कवद्युये लोचने यस्य रोदसी आरोधवेत्तत्व ॥ २४ ॥ दरीवक्त्रं
...ति वक्त्रे गुहाश्च तद्रुमालामित्यन्वयः कथंभूते ते नेत्रमलोपिवतां नाद्वाणि जिह्वया लिहतां भुवनत्रयं समस्तं महता विष्णीर्मेनं गद्वादंष्ट्रायेति

ष्ट्रां तांतस्व लोकानां युगांतसमये यथा ॥ विषाग्निर्विवर्द्धमानं तन्निमिषमात्रं दिने दिने ॥ २३ ॥ दग्धशैलस्थलीकाशं दंष्ट्राश्रानीकव
र्द्धितं तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोयलोचनं ॥ २४ ॥ देदीप्यमाने त्रिशिखं स्थूलआरोरथरोदसी ॥ व्याप्तं तद्वदनं दंतं ज्वालयंतं प-
दा महीं ॥ २५ ॥ दरीगंभीरवक्त्रेण पिबंतावनलस्थलं ॥ लिहता जिह्वया व्योमभुवनत्रयं ॥ २६ ॥ महाहिगाढदंष्ट्राणां कृंतमाण-
मुद्गरुं भुजैः ॥ विव्रस्ता उद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ २७ ॥ येनोद्धृता इमे लोकाः समसाता ईश्वरेण तेन ॥ सर्वे त्रस्यंति शोकाः
पापः प्रमदाकुलाः ॥ २८ ॥ तं निजफणरोति हृत्य समग्राणां विभुर्वपुस्ता ॥ बोद्धृत्याश्च शशोद्योधेः मोग्रमंत्रानिकाल्मशाः ॥ २९ ॥ त
तस्त्रे विस्मिताः सर्वे विश्वमायस्यतेजसः ॥ प्रत्यंचमादिदेवं भुवपतस्तुः समाहिताः ॥ ३० ॥ ॥

...हरचनाम निमित्तिर्येनाहृताः श्रुताः त्वाक्षेमहर्तिर्यथाच्युतमसमंजेनाथा यथा चक्रगतिः स इमा लोकाना यदुगोत्रहम स्त्रष्टुचक्रमिति । अयमन्नान्वितवान्
...तो जायेवाय पतये च मंतव्या प्रियांति त्रिभुवनस्थितेन यथा सत्वात्तकाप्रियामनासं लब्धा न त्वत्वेवाभिद्वाउपद्रुतमित्यर्थः । महात्मरोगपरित्राणमथ्यतो नरवैवि-
तिश्चिरमेवप्रपद्यते सुराः शरणमागताः ॥ ३० ॥ ॥

इरिणमूषरं २

भा०।६ अतएवोपरेभ्यश्चागमनादिनिमित्तेभ्यः छेदेसतिपुनर्विरोहःप्ररोहोभवत्विति। वरेणनिर्यासरूपेणब्रह्महत्यायादृष्टत्वान्निर्यासोनभक्ष्यः॥ शश्वत्

३० कामवरेणायावत्प्रसवंगर्भोपघातेनैवसंभोगवरेण॥ अतएवरजोदर्शनेतत्संगादिनकार्यं॥ द्रव्यभूयोवरेणायस्मिन्द्रव्येक्षीरादावपोमिश्रा

नवेद्वा। तद्द्रव्यस्यभूयस्त्वंमाभूत्किंस्यादितिवरेणाप्यहोभक्षेभवनिर्व्वंगेजमादिनाभूयस्त्ववरेणइवभूयस्त्वजतिपाठेप्ययमेवार्थः। यद्वाइवभूयस्त्वं

सांनिध्यंकंइवबलंतेनवरेणा। अथवापिताजंस्थविश्वरूपोवेताइंद्रस्यश्रांकृतावेंद्रोःतद्विनागफलमाह। तत्यापंहरतिनिराकरोति। का

र्इरिणंब्रह्महत्यायाःरूपंभूमौप्रदृश्यते॥ तुर्यंछेदविरोहेणवरेणजगृहुर्द्रुमाः॥ ॥ तेषांनिर्यासरूपेण ब्रह्महत्या

प्रदृश्यते॥ शश्वत्कामवरेणांहस्तुरीयंजगृहुःस्त्रियः॥ रजोरूपेणतास्वंहोमासिमासिप्रदृश्यते॥ द्रव्यभूयोवरेणापस्तु

रीयंजगृहुर्मलं॥ तासुबुद्बुदफेनाभ्यांदृष्टंतद्धरतिक्षिपन्॥ हतपुत्रस्ततस्त्वष्टाजुहावेंद्रायशत्रवे॥१०॥ इंद्रशत्रो

विवर्द्धस्वमाचिरंजहिविद्विषं॥ अथान्वाहार्यपचनादुत्थितोघोरदर्शनः॥११॥ ॥

क्षिपन् बुद्बुदादिजलाद्बहिःप्रक्षिपन्नित्यर्थः॥ यद्वाक्षिपन्जलंपापंहरति आहरति गृह्णातीत्यर्थः॥ अथचतस्मात्पानपरिवर्ज्यास्तथा अदि

क्रत्वर्थत्वनाशेषापांतरेहरिकिंचित्संद्पापंइंद्रायइंद्रहंतुःशत्रवेशत्रुत्वप्रेतदाहाइंद्रशत्रोविवर्द्धस्वेतिस्वरेणचेंद्रशत्रुपदस्याद्युदात्तत्वात्तुब उत्तरस्य

हुव्रीहौप्रकृत्यापूर्वपदमितिस्मृतेर्बहुव्रीहिलक्षणापत्त्याइंद्रएवतस्यशत्रुरभवत्ततइंद्रेणाकृत्या। यदब्रवीत्त्वष्टाहेंद्रशत्रोवर्द्धस्वेतितस्मादेनं राम

इंद्रःशत्रुरभवदिति। तथाशिक्षायां। मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह। सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधा ३०

दिति॥ अन्वाहार्यपचनाद्दक्षिणाग्नेः॥११॥ ॥

नयमेव विश्वरूपेण तु हतो शक्रेणाकोपतः। त्वष्टा वोत्पादिते वृत्रे तेनैतीति द्विवेहस्कंधीः॥१॥ सोमस्य पीथं पानं यस्मिन् एवं सुरापीथं अन्नमत्तीत्यन्नादं ... विश्वरू
पो वै त्वाष्ट्रः। सुरेहितो देवानामासीद् दिश्यादि श्रुतिरंभे वेयांतश्शास्त्र सुरपत्त्वपातमाहासवा रक्षिदात्यो। प्रत्यक्षं प्रकटं यथा नवतितथा सविनयं देवेभ्यो
हविर्भागं इंडा येदं श्रेष्ठ इदमित्युच्चैः वदन्नत्र हेतुः। यस्य पितरो देवाः मातुः असुरेभ्यः परोक्षं गुप्तं नाम ददौ। तद्देवा ह। देवा यजमानोऽस्माकमसुराणां

श्रीशुक उवाच॥ ॥तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत। सोमपीथं सुरापीथमन्नादमिति शुश्रुम॥१॥ स वै बर्हिषि दे
वेभ्यो भागं प्रत्यक्षमुच्चकैः। अवदद्यस्य पितरो देवाः सप्रश्रयं नृप॥२॥ स एव हि ददौ भागं परोक्षमसुरान्प्रति। यजमानोऽवह
द्भागं मातृस्नेहवशानुगः॥३॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः। आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा॥४॥ सो
मपीथं तु यत्तस्य शिर आसीत्कपिंजलः। कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः॥५॥ ब्रह्महत्यामंजलिना जग्राह यदपी
श्वरः। संवत्सरांते तदघं भूतानां स विशुद्धये॥६॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः। भूमिस्तुरीयं जग्राह खातपूरवरे
ण वै॥७॥ ॥

तितामामेवं हत्वेति तां वैरयितुं समर्थोऽपि तथापि जग्राह। संवत्सरं तत्रैव स्थित्वा संवत्सरांते तस्याः क्रोशतीतः सर्वभूतानां मध्ये विशुद्धये लोकापवादपरिहारा
य महाहरिर्द्वो भूम्यादिभ्यस्तदघं विभज्य ददौ। तुरीयं चतुर्थं भागं खातस्य गर्तस्य पूरः पूरणं तेन वरेण यद्दिखातस्य पूरणं स्वतएव भविष्यतीति तर्हि ग्रहिष्यामी
त्येवं तावद्वरेण जग्राहेत्यर्थः॥७॥ ॥

ना०व० दंशितानेककवचिताः सोपि मा प्रमाद्भ्यात् मुच्यते तेन श्रुत्वा यं नत्वेदे वा एतद्विद्याप्रभावमितिहासेनाहा इमामिति सार्धैस्त्रिभिः मरुधन्वनि निरुदके
२९ देशे अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितं यत्र द्विजक्षयः यो देहत्यागः तस्योपरि सद्यस्तत्क्षणमेव गगनान्न्यपतत् तयावांतरे गगनात्तिः म

मघवन्निदमाख्यातं वर्म नारायणात्मकं । विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥ ३४ ॥ एतद्धारयमाणस्तु यं यं पश्यति च
क्षुषा । पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ ३५ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् । राजदस्युग्रहादिभ्यो व्याघ्रा — नैरुदकेदेशे
दिभ्यश्च कर्हिचित् ॥ ३६ ॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः । योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३७ ॥
कौशिकस्य तस्योपरि विमानेन गंधर्वपतिरेकदा । ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३८ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्य
वाक्शिराः । स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ ३९ ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ॥ श्रीशु
क उवाच ॥ ॥ य इदं शृणुयात्काले यो धारयति चादृतः । तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥ ४० ॥ एतां विद्यामधिग
तो विश्वरूपाच्छतक्रतुः । त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४१ ॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे
नारायणवर्मोपदेशो नामाष्टमोऽध्यायः ॥ ॥ — राम

ह वालखिल्योपदेशादस्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्वधाम गांधर्वलोकं जगाम । अधिगतः प्राप्तः सन् ॥ ४१ ॥ ॥ इति षष्ठेऽष्टमोऽध्यायः ॥ ॥ — २९

नैत्रणा। मंत्रोस्य: पाद१

तिमा घारा यस्त्रैहोतिममयान्ग्रमिवर्गवकृत्रेष्ठतं मममारिमैथंहिंघिहिंवीशुशंवंडाकारगणि मंडलानियस्मिन्नहे शतखंडचर्मान्नअघोनामघवतां
हिमा वज्रं बिंदु दर्शयापवज्रांगां वज्रयदृष्टीनां वज्रंभिह रंयते ये श्रीलयंत्रं घोश्चः पापेश्च श्रेयः प्रतीपकाः रश्मयाघातकाः स्तोत्राणि दृहद्रथं तंगदि
सामानितेः स्तोत्रं श्रुते मे भूयत गति स्तोत्र स्तोत्रः छंदोमयः वेदमूर्तिः उपमोभिगतत्मानितिश्रुतेः एकपद्यपारे स्तोत्रः गीतिः रुक्ता त्वगणिस्तोत्र स्तोमेति
पावेसामाघा स्तुतत्र स्तोमंः नामानि च त्वपाणि वयानानि च वाहनानि आयुधानि च नेत्रादीनां तु पार्षदप्रमुखाणां पार्षदस्तु रथ्यास्वपांतं मंत्रश्च

विंतिममधाराममिवर्गरिमैथमीश उग्रको मंमहिंघिहिंघिंघिं वज्रं भिवर्मन्नशतखंडाद्याहिमामघोनांहरयाय च तुभ्यं ॥२५॥
यंत्रो लयं यहेश्वी लक्ष्मीकेतुश्चोलक्ष्मणवचामरीष्ट्रपेश्वोदंष्ट्रिश्चोभूतेश्चो घोश्चणवच ॥२६॥ सर्वाण्येतानि भगवन्नामरूपाणि
कीर्तनात् । पुण्यानुमंत्रयं मघोनः श्रेयः प्रतीपकाः ॥२७॥ गरुडो भगवान् स्तोत्र स्तोमः छंदोमयः प्रभुः । रक्षत्वशेषकृच्छ्रेभ्यो वि
ष्वक्सेनः स्वनामभिः ॥२८॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः । बुद्धीन्द्रियमनःप्राणान्पांतु पार्षदभूषणाः ॥२९॥ यथा हि
भगवानेव वस्तुतः सदसच्च यत् । सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥३०॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयं । भूष
णायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥३१॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥३२॥
विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः । प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥३३॥ ॥
मघवन्निदमाख्यातं वर्म नारायणात्मकं । विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥ ... हितोपि मत्यमानेनसत्यस्तेन प्रमाणेनांऽत नरपिश्रीदृसिंह एव
प्रार्थ्यते । विदिक्षु दिक्षु पातु ... सर्वत्रारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेनस्वतेजसा स्वप्रभावेन ग्रस्तानि समस्तानि दिग्गजविषशक्रजल
बाणसूर्यादीनां तेजांसि खिलावायेन सः ॥३३॥ ॥

ला० ४०
२४

स्वविवर्त्मानौ ततः विवस्वतौ चर्षणयः [illegible] ज्ञानवंतः पश्यंतिकर्मवौनि घंटाभुक्तेः। यत्र येषु आत्मानुसंधानविशेषेण मानुषी जातिश्चोपकल्पि
ता। तथा च श्रुतिः। [illegible] कुपितं हरमिति शेषः विवृतद्विजः प्रकटितदंतः [illegible] विमतेन अवज्ञातेन बृहस्पतिना परित्यक्ताः

ला०
२३

विवस्वतः श्राद्धदेवं संज्ञा [illegible] तपतीं२ पर्यावेर [illegible] जातः४ [illegible] वर्तमाना१ [illegible] चर्षणिः२

मिथुनं च महाभागा यमं देवं यमीं तथा। सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि॥४०॥ छाया शनैश्चरं लेभे सावर्णिं च म
नुं ततः। कन्यां च तपतीं या वै वव्रे संवरणं पतिं॥४१॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्म
णा चोपकल्पिता॥४२॥ पूषानपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा। योऽसौ दक्षाय कुपितं जहास विवृतद्विजः॥४३॥ त्वष्टुर्दै
त्यात्मजा भार्या रचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान्॥४४॥ तं वव्रिरे सुरगणा स्वस्रीयं द्विष
तामपि। विमतेन परित्यक्ता गुरुणांगिरसेन यत्॥४५॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे षष्ठोऽध्यायः॥ ॥ राजो
वाच॥ ॥ कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः। एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ॥१॥ ॥

देवाः१ बृहस्पतिना१ [illegible] देवानां२ अपराधं१ बृहस्पतौ२

तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवंतः॥४५॥ ॥ इति षष्ठे षष्ठः॥ ॥ सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः। [illegible] संपरि
त्यक्तैर्देवैः पौरोहित्यमथाकरोत्॥१॥ कस्य हेतोः कस्माद्धेतोः आत्मनः शिष्याः सुराः परित्यक्ताः। अक्रमम् अपराधं॥१॥ ॥छ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कश्यपपत्नीनां

अत्यचैतस्यामतताद्यशाग्रथंश्रुत्क्रमेणतांमांवंशानाहं॥ तिमेरित्यादिनोमोग्रमाश्वसमायाःपुत्राः॥ प्राधान्निकानष्टादशस्याह वैश्वानरोदनोःपुत्राःश्रेष्ठ
ता॥ काःप्रजापतिःकश्यपव्यपेमोदानवीपरिणायनेहेतुःब्रह्मणाबोधितश्चति॥ तयोःषष्टिमहस्राणिनिवातकवचाःपुत्राजाताःतांसुषुगंगतंसप्तेपिता एकशफा...

तमेनीबाः१ पक्षवः नहुषपुत्रः५ ब्रह्मदत्तः२ धनुपुत्र५

तिमेस्रादिमाणाश्रमनंश्वापदाःमरमश्रुताः॥ श्यास्तुमलेर्म्महिषाणांवोमेवाश्चैकशफाःस्मृताःजाताश्चाद्याश्वनेमत्स्वममांगणाः॥ २७
दंष्ट्रश्रूकादयःसर्पाःगजतनुक्रोधवशांत्मजाः॥ इलायाम्सृष्टाःसेवैयावषानाश्वमोरमाः॥ २८॥ अरिष्टायाम्तुगंधर्वाःकाष्ठयाद्विशफेतराः॥
मुनाटनोमेकषष्टिस्वेषांपायोनिकानष्टाह॥ २९॥ द्विमूर्द्धाशवरोरिष्टोहयग्रीवोविलावसुः॥ अयोमुखःशंकुशिराःस्वर्भानुःकपिलोरु
णः॥ ३०॥ पुलोमाहपषर्वाचैएकचक्रोर्तापनः॥ धूम्रकेशोविरूपाक्षोविप्रचित्तिश्चदुर्जयः॥ ३१॥ स्वर्भानोस्तुप्रभाकन्यामुवाहनहु
कन्या नहुषा न ५ षः॥ ३२॥ पुलोमावृषपर्वाणःकन्याशर्मिष्ठायस्यातिर्नहुषोवली॥ ३३॥ वैश्वानरस्तुमायाश्चवंतप्रश्चामदर्शना॥ उपदानवीहयशिरा॥ पुलोमा ऋ४
उपदेमेश्च दिःकिलौ हपषर्वाणस्तुअमिष्टायायातिर्नहुषोवली॥ ३३॥ उपदानवीहिरण्याक्षंक्रतुर्हयशिरांस्था॥ पुलोमाकालकांवहेवैश्वानरसुतेनुका॥ ३४॥ उपयेमेथभगवान्
कालकातथा॥ ३३॥ उपदानवीहिरण्याक्षंक्रतुर्हयशिरांस्था॥ पुलोमाकालकेयाश्चदानवाबहुशालिनः॥ ३५॥ तयोःषष्टिमहस्राणियज्ञध्वंसेपितुःपितो॥ जघानसमरां
कश्यपोब्रह्मबोदितः॥ पौलोमाःकालकेयाश्चदानवाबहुशालिनः॥ ३५॥ तयोःषष्टिमहस्राणियज्ञध्वंसेपितुःपितो॥ जघानसमरां
तोगजेन्द्रकदण्डप्रियंकरः॥ ३६॥ विप्रचित्तिःसिंहिकायांशतंचैकमजीजनत्॥ राहुज्येष्ठंकेतुशतंग्रहत्वंयेउपागताः॥ ३७॥ अथा
तःश्रूयतांवंशोयोदितेरनुपूर्वशः॥ यत्रनारायणोदेवःस्वांशेनावतरद्विभुः॥ विवस्वानर्यमापूषात्वष्टाथसवितात्मगः॥ ३८॥ धाताविधा
धाताबरुणोमित्रःशक्रउरुक्रमः॥ विवस्वतःश्राद्धदेवंमनुंसंज्ञास्यजतैमन्तुं॥ ३९॥ ॥ उपलोमाकालकजोः४
महोत्हिनोजघानौराहुज्येष्ठोयमश्च॥ अश्वयतश्चजनयत्॥ ३९॥ स्त्री ॥व॥ वामनः२ ॥व॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रा०पू० २७ तत्राष्टाक्षरेणाषडंगन्यासं मूर्तिन्यासमाह पादयोरिति मोंईनम उपाणव मंत्र इति मोंकाराद्यैकैकमक्षरं विन्यसेन्नाविपर्ययं यथा लवतोवंशिरस्यादि
पादांतं वा विन्यसेत्। उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः। द्वादशाक्षरन्यासे द्वादशप्रणवादियकारांतमिति। प्रणव मंत्र इति मंत्रैकैकमक्षरं
त्रिणतर्जनीमारभ्य वामतर्जनीपर्यंतं मंगुलीषु परिशिष्टमक्षरं चतुष्टयमंगुष्ठयोरांतपर्वसु न्यसेत्। मंत्रांतरन्यासमाह ह्यस्येदितिषकार

पादयोर्जानुनोरूर्वोः स्फिदरे हृद्ययोगसि ॥ ५ ॥ भुवोशिरस्यातु पूर्व्वादोंकारादीनि विन्यसेत्। ॐ नमो नारायणायेति
विपर्ययमथापि वा ॥ ६ ॥ कुर्यान्न्यासं ततः कुर्यात् द्वादशाक्षरविन्यासं। प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ॥ ७ ॥ न्य
मेहृदये कारंविकारं मंतु मूर्द्धनि। षकारं उभ्रुवोर्मध्ये णाकारं शिखया दिशेत् ॥ ८ ॥ वेकारं नेत्रयोर्युंज्यात् नकारं
सर्व्वसंधिषु। मकारमस्त्रमुद्दिश्य मंत्रमूर्त्तिर्भवेद्ध्रुवं ॥ ९ ॥ सविसर्गं फडंतं तु सर्व्वदिक्षु विनिर्द्दिशेत्। ॐ विष्णवे नमः शिरसि
आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतं। विद्यातेजस्तपोमूर्त्तिमिमं मंत्रमुदाहरेत् ॥ १० ॥ ॐ हरिर्विद ध्यात्ममसर्व
रक्षोंसम्पांडिपषड्मशपतगेंडषट्श्रीरंगरिवंम्मीमिगदेभ्रुवापपाशानंदयानोरक्षष्टगणोष्टवाङ्कः ॥ ११ ॥ ॥

णकारयोर्विन्यसेत् षडक्षरमणि हृदयादिषु न्यसेत्। मकारमस्त्रमुद्दिश्य ध्यावातत्। मकारांतं मंत्रमस्त्रफडिति दिक्षु विनिर्दिशेत्। ध्येयमी राम २७
श्वरत्वपमात्मानं ध्यायेत् षट्शक्तिः ऐश्वर्यादिनिर्गवत्वाद्धवाप्य ति। विद्यावते जस्तपस्तु श्रूर्तिर्यस्य इमंमवक्ष्यमाणं श्रीनारायणकवचाख्यं
अष्टयुगाः अणिमाद्यष्टैश्वर्ययुक्तः ॥ ११ ॥ ॥

क्रियदेतत्प्रार्थितमल्पमेव । अथाधिकमधिकरिष्ये । नीता हा त्वत्तामपि स्मा विनायमोग्यनेनीवेक्षण्यां श्रीनारायणकवचाभिकया । असुरचमूः

दैत्यसेनाः ॥४०॥ ॥ षष्ठे सप्तमः ॥ ॥ अष्टमे विश्वरूपप्रोक्तं वर्म नारायणात्मकम् । इंद्राय प्राह येनेंद्रो जिग्ये दैत्यानथोजयत् ॥१॥ त्रिलोक्याः संवंध्विनीश्रि

तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् । भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥३७॥ ॥ श्रीबादरायणिरुवाच ॥ ॥

तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः । पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥३८॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि वि

द्यया । आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः ॥३९॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः । तां प्राह स महेंद्राय वि

श्वरूप उदारधीः ॥४०॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे सप्तमोऽध्यायः ॥ ॥ राजोवाच ॥ ॥ यया गुप्तः सहस्राक्षः स

वाहान्रिपुसैनिकान् । क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥१॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् । यथात

तायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥२॥ ॥ श्रीबादरायणिरुवाच ॥ ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते । नारायणाख्यं वर्मा

ह तदिहैकमनाः शृणु ॥३॥ ॥ विश्वरूप उवाच ॥ ॥ धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः । कृतस्वाङ्गकरन्यासो मन्त्राभ्यां

वाग्यतः शुचिः ॥४॥ नारायणपरं वर्म सन्नह्येद्भय आगते ॥ ॥

यं मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वांगेषु करयोश्च न्यासो येन । नारायणमयं परं वर्म सन्नह्येत्तत्त्वश्रीयात् ॥ ॥ राम ॥ ॥ छ ॥ ॥

भा०ष०
२६

पैत्र्यस्य पराभवस्य आर्तिं मां संदेशं आज्ञां । वृणीमह इति । न गर्हयन्ति ह्युपाध्यायत्वे कनिष्ठस्य ममाभिवंदनं करिष्यथ तच्च गर्हितं तत्राह । नेति । अर्थेषु प्रयोज
ननिमित्तं यविष्ठानामभिवादनं नानिंदन्ति । किं च छंदोभ्यो मंत्रेभ्योऽन्यत्र वयो ज्येष्ठ्यस्य कारणं न तु मंत्रेषु अतोऽस्माकं मंत्रदातृत्वेन त्वमेव ज्येष्ठोऽसि यविष्ठ
मि । यद्वा छंदोभ्योऽन्यत्र वेदान्विहाय वयः वयो ज्येष्ठ्यस्य कारणं न भवति किं तु वेदा एव कारणं तस्माच्छ्रेष्ठो भवान् । वेदज्ञत्वाच्च त्वमेव ज्येष्ठ इत्यर्थः अनिंदित
मपीदं ब्रह्मवर्चसक्षयकरत्वान्न करिष्यामीत्याह स्माह द्वाभ्यां । विगर्हितं पौरोहित्यं धर्मशीलैः ब्रह्मवर्चसो हेतुत्वात् किं च ब्रह्मवर्चस उपव्ययं क्षयस्थानं स्वल्पं ब्रह्मवर्च

तस्मात्पितृणामार्तानामार्तिं परपराभवं । तपसापनयंस्तात संदेशं कर्तुमर्हसि ॥३१॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुं । यथांजसा विजेष्यामः सपत्नांस्तव तेजसा ॥३२॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनं । छंदोभ्योऽन्यत्र न ब्रह्मन् वयो ज्येष्ठ्यस्य कारणं ॥३३॥ ॥ऋषिरुवाच॥ ॥अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः । स विश्वरूपस्तानाह प्रहसन् श्लक्ष्णया गिरा ॥३४॥ ॥विश्वरूप उवाच॥ ॥विगर्हितं धर्म्मशीलैर्ब्रह्मवर्च उपव्ययं । कथं नु मद्विधो नाथा लोकेशैरभियाचितं । प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥३५॥ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्त्तितसाधुसत्क्रियः । कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥३६॥ ॥

पौरोहित्यं ब्रह्मतेजसः क्षयकरं ॥२॥ लोके पूर्वमाचरितं ... कथं प्रत्याख्यास्यति
शिलोंछनेन प्रवर्तित

सः उपव्ययकरं प्रत्याख्यास्याम्यहं न मादृशो नार्हतीत्याह । कथं त्विति । ते वो शिष्याः शिक्षणार्हाः स एव प्रत्याख्यानात्मा स्वार्थ एव हि शिष्यस्य स्वार्थ उच्यते । ननु पौ
रोहित्येन धनलाभाद्धर्माः सिद्ध्यन्ति अत आह निर्धनस्यापि धर्म्मः अत एव तेन लोको हृष्यति तत्राह । अकिंचनानां शिलोंछनं हि धनं क्षेत्रे स्वामि
परित्यक्तकणिशोपादानं शिलं हट्टादौ पतितव्रीह्यादेरुपादानमुंछनं । इह गृहाश्रमे तेनैव निर्वर्त्तिता साधूनां सत्क्रिया येन ॥३६॥ ॥

राम
२६

परेभ्यः शत्रुभ्यो वः पराभवः तत्र हेतुः अयमनयो यस्य अन्यायस्य संबंधी फलरूप आसीत्॥ युष्माकमेव वैरिणो दैत्या रोगे ये यो ते थ॥ गुरुतिरस्कारा
पेक्षया पचयो पचयकारणमित्याह दृष्टांतेनाह मघवन्निति॥ द्विषतः शत्रून् काव्यं भार्गवं उमे वा मे ये उपचितान् उपचितत्वमेवाह॥ आददीरन्नित्यर्द्धेन
भृगुरस्य देवो मंत्रो येषां अनुशिक्षितार्थाः शिष्याः॥ यतः विप्रा गावो गोविंदो गावश्चेश्वराः अनुग्राहका येषां तेषामेवाभद्राणि न भवंति अथवा प्रत्युत भवंति तत्र

तस्यायमनयस्यासीत्परेभ्यो वः पराभवः। प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः॥२१॥ मघवन्द्विषतः पश्य प्रक्षीणान्गु-
र्वतिक्रमात्। संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः॥२२॥ आददीरन्निलयनं ममापि भृगुदेवताः। त्रिविष्टपं किं गणय-
न्त्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः॥२३॥ न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणां॥ तद्विश्वरूपं भजताशु वि-
प्रं तपस्विनं त्वाष्ट्रमथात्मवंतं। सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म॥२४॥ ॥श्रीशुक उवाच॥ ॥त एव-
मुदिता राजन्ब्रह्मणा विगतज्वराः। ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन्॥२५॥ ॥देवा ऊचुः॥ ॥वयं तेऽतिथयः प्राप्ता आ-
श्रमं भद्रमस्तु ते। कामः संपाद्यतां तात पितॄणां समयोचितः॥२७॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां। अपि पुत्रवतां ब्रह्मन्
किमुत ब्रह्मचारिणां॥२८॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः। भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः॥ दयाया भ-
गिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयं। अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः॥३०॥ ॥

स्याद्वं अथानंतरमेव ऋजतां अस्य कर्म अस्यरूपत्वयातां उदिता उक्ताः॥ अतिथीनां पितॄणां च प्रशंसार्थमाह॥ आचार्य उपनीय वेदाध्यापकः ब्रह्मणो वेद
स्य मूर्तिरिति॥ अतिथिः स्वयं साक्षात् आत्मनः श्रीविष्णोः॥ यद्वा आत्मनः स्वस्य सर्वभूतेषु आत्मदृष्टिः कर्तव्येत्यर्थः॥३०॥ ॥[illegible]॥

ना० प्र०
२८

दिन आरभ्य मुहूर्त्तत्रयात्मकः प्रातःकालः तं गदिमं झेषु गतेष्वपराह्णादिसंज्ञेऽरत्नाद्यर्थ नेमीमां केशवः पातु त्रिभिस्त्रिभिरासंगवं संगवमभिद्यायांस्त्रिधामावत्स्यादित्रि
मूर्त्तिः श्रीमाधवः दोषे प्रदोषे हृषीकेशः अर्धरात्रे अर्धरात्रपर्यंतिकाले निशीथे च एकः एव पद्मनाभो रक्षतु अपररात्रे ईशः श्रीवत्सधामा प्रत्यूषे ईशः श्रीजना
र्दनः श्रीदामोदरः प्रभाते श्री विश्वेश्वरो भगवान् अवतु चक्रं युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् अरिसैन्यं दंदग्धि अतिशयेनद

मांकेशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः ॥ नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुरिन्द्रपाणिः ॥ १९ ॥ देवोऽप
राह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां ॥ दोषे हृषीकेश उतार्द्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २० ॥ श्रीवत्सधामा
पररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्द्दनः ॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्त्तिः ॥ २१ ॥ चक्रं युगान्तानलति
ग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तं ॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २२ ॥ गदेशनिस्पर्शनविस्फुलिंगे
निष्पिंढि निष्पिंढ्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २२ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशा
चविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥ २३ ॥ ॥

हृति तस्याः स्पर्शनेन विस्फुलिंगाः प्राप्तास्ताः अजितस्य प्रियासि अतः रक्षेति विनयसम्बोधनं कूष्मांडादिग्रहान् चूर्णय इत्यर्थः शरणादरेण ह्याप्तिशयार्थत्वं हे दरेंद्र शंख कृष्णेन पूरितः सन् भीमस्वनः सन् अरेः हृदयानि कंपयन् यातुधानादीन् विद्रावय
तथा येन तद्देहे निकटे स्थितः अशनिवत्स्पर्शो यस्यास्तस्याः स्फुलिंगा यस्याः तथाभूताः संबोधनं हे गदे त्वम् अजितस्य प्रिया असि अतः कूष्मांडादी
न् पिंढि निःपिंढि संचूर्णय संचूर्णय अरीन् चूर्णय चूर्णय सर्वान् नाशय तिष्ठ प्रभावात् हे दरेंद्र पांचजन्य त्वं यातुधानादीन् विद्रावय विप्रग्रहाः ब्रह्म
राक्षसाः येषां घोरा दृष्टयः तान् ॥ २३ ॥ ॥

राम
२८

यादसां गणाः तेभ्यः वरुणपाशश्च तस्मात् । अखर्वीकृतः सर्वव्यापी स्वपदः आदिवर्द्धमानः तेषु मे कस्मात् नेषु अमेयः सिद्धो वराहो मामध्वनि रक्षतु यज्ञेश्वर वयवदृष्टैः क
ल्प्यते नित्यत्वात् इति तथा उन्नीता उद्धृता धरा येन मत्स्य अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः शत्रुत्वात् धर्मात् दलितव्याघ्रात् हिंसात् गर्वात् नरक
अवताराद् दत्तोदत्तात्रेयः अयोगात् अयोगात्त्वं शास्त्रोपशिष्टदेवानां हेलनं नमस्कारमन्त्रादागमनं तस्मात् उत्तमार्चनसांतरात् देवपूजादिव्रतादिति शदय

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् । स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥१३॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः । विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१४॥ रक्षत्वसौ
माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः । रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥१५॥ मामुग्रधर्मा
दखिलात्प्रमादान्नारायणः पातु नरश्च हासात् । दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥१६॥ सनत्कुमारो
ऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् । देवर्षिवर्यः पुरुषार्चनान्तरात्कूर्मो हरिर्मां निरयादशेषात् ॥१७॥ धन्वंतरिर्भगवा
न्पात्वपथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा । यज्ञश्च लोकादवताज्जनान्ताद्बलो गणात्क्रोधवशादहीन्द्रः ॥१८॥ द्वैपायनो भगवानप्र
बोधाद्बुद्धस्तु पाखंडगणात्प्रमादात् । कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥१९॥ ॥

राघवः पापात् नारदो लोकात् जनापवादात् यज्ञः । जननिमित्तो यो अंतकः घातः तस्मात् बलभद्रः अवतात् क्रोधात् इति पापेभ्यः कालात् हन्ता यो धर्मशास्त्रपा
खंडगणात् दैहिकः शेषः कालमलं पापात् कलेः कल्किः धर्मावनाय धर्मरक्षणाय उरुः महान् कृतोऽवतारो येन ॥१९॥ ॥ छ ॥ ॥राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रा० स० विद्युषानांसात्विकानांदेवानामीश्वरोमहांस्तत्रसिंहासनस्थोराजाभुवनानंनकर्षादितिरिष्टाश्चवदंतितत्राहायुक्तितिह्रासांविमणामासनं।ऊपथंदिश्यं
२५ तिऊपदिशंतीतिऊपथदेष्टारस्तेषांवचः।अश्ममयःसर्वोयेषांतेतथामजंतंलक्ष्मउमज्जतीतिहत।अगाधर्मनीरापिपणासस्थतां।निशवःशायही

द्यौ ४ ६ = द्यौ १ ५ ३ २ लक्ष्मा १ ५ सार्वश्रितः ४ त्रिरसमासूनप्राप्तः ४ महान्तत्रिवैकं १ श्रसनं

कोरिस्थेत्यंडितोलक्ष्मींत्रिविष्टपपतेर्गणी।ग्यांहमांसुरंभावंनीतोंग्धविभुक्षेम्वरश॥१२॥येपारम्भूच्छ्यविमणामौंपविवितिस्वनंनकिंव
नो।पतनंतिछेदितिब्रूयईस्मंतेनपुरंगविडुः॥१३॥तेषांऊपथदेष्टासांपतंतांतमसिद्यवेश।येश्रद्दध्युर्वचिस्तेवेमज्जंतश्मसत्रवाः
३ कृ स्मातिः २ वृ॥१४॥अथाहंममगवार्य्यमंगाधविषिणांद्विजं।प्रसादयिष्येनिशंवःशीर्णातत्रवरांस्रष्टशत्रू॥१५॥एवंचिंतयतस्तस्यमघो
श्यां ४ नोंलगावानरहोतः।हृहस्यातिगंतोंद्दष्टांगतिमिच्छात्ममायया॥१६॥उग्रेणविगतःसंज्ञोपरीत्वगवास्वेगहः।ध्यायन्नधि
अकृत्रापरांधकृतेरे ईध्यानतोनकृताप गामुवैर्युनुरशर्मनालसतांत्मना॥१७॥तंक्रात्वेवौभगःसर्वेच्छ्रितोशनमंमतो।देवास्तत्रघर्मस्वकाईर्मदप्रातोता अधतस्मा:५
दैत्याः ३ यिना॥१८॥तोविसृष्टेवनिष्ठोवौर्निर्निर्गोनगोरूवोहिवः।ब्रह्माणंशरणंजग्मुःसहेंद्रानाकवासिनः॥१९॥तांस्तथाद्यद्विताव्वी
ब्रह्मा २ त्सगवानात्मभूर्जः।ऊपथापरवादेववावापरिमोंलग्रनौ॥२०॥ब्रह्मोवाच॥ ।अहोवतांछेरश्रेष्ठाह्यंसडंवाःक्रांतमहता
उ कृ स्मातिम १ वृत्तिश्वांह्मणंदांतमैस्त्रघीन्नाष्यनंदतां॥२१॥ ॥ देवान १ ज्ञानोपाय ४

इंद्रः १

नःसनस्तविकयात्मनायर्यागेःसंज्ञांज्ञानोपायपरीत्वमाणोविनाधिगत्तश्व्रपासःमनांरातताथिनब्रह्माः।निर्निन्नाथंगानिरतमी राम
गानिशिरांसिडरवोवाहव्रह्मयेषां।वोधभाकंस्तातंकरणंमहद्दलडंतदाहावृत्तिश्वमितिनाध्यनंदतनात्यनंदितवंतः॥२२॥ ॥छ॥ ॥ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सिंहासनं २

मदंडोयदासंआसंवावस्यतिंनोत्पनंदत्तनादृतवान्नातदासऔगिरसभातोनिर्गत्यहंसीद्धयहमायायावित्यष्टानामत्वया।अनादरहेतुंमदंदर्शयितुंतांविशि
नष्टि।त्रिभुवनेस्तूर्यमदेनोल्लंघितःस्मतांपंथायेनमः।परिश्रितःपरिदृष्टतीःआसनंसमंतात्स्मिन्नंत्यासनंतदास्थितःपारमेष्ठ्योमहाराजचिन्हैः।आसन

श्रीवादरायणिरुवाच॥ ॥इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः।मरुद्भिर्वसुभीरुद्रैरादित्यैरृभुभिर्नृप॥२॥विश्वेदेवैश्चसाध्यैश्च
नासत्याभ्यांपरिश्रितः।सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः॥३॥विद्याधराप्सरोभिश्चकिन्नरैःपतगोरगैः।निषेव्यमाणोम
घवान्स्तूयमानश्चभारत॥४॥उपगीयमानोललितमास्थानाध्यासनाश्रितः।पांडुरेणातपत्रेणचंद्रमंडलचारुणा॥५॥युक्तश्चा
न्यैःपारमेष्ठ्यैश्चामरव्यजनादिभिः।विराजमानःपौलोम्यासहार्धासनयाभृशं॥६॥सयदापरमाचार्यंदेवानामात्मनश्चह।नाभ्य
नंदतसंप्राप्तंप्रत्युत्थानासनादिभिः॥७॥वाचस्पतिंमुनिवरंसुरासुरनमस्कृतं।नोच्चचालासनादिंद्रःपश्यन्नपिसभागतं॥८॥ततो
निर्गत्यसहसाकविरांगिरसःप्रभुः।आययौस्वगृहंतूष्णींविद्वान्श्रीमदविक्रियां॥९॥तर्ह्येवप्रतिबुध्येंद्रोगुरुहेलनमात्मनः।
गर्हयामाससदसिस्वयमात्मानमात्मना॥१०॥अहोबतमयासाधुकृतंवैदभ्रबुद्धिना।यन्मयैश्वर्यमत्तेनगुरुःसदसिकात्कृ
तः॥११॥

आर्द्धस्थितयापौलोम्यासहविराजमानःसन्नुत्थानासनादिनानाभ्यनंदत।नवोद्धवालत्रासनएवस्थितोपिकिंचिन्नचलितवान्।श्रीमदेनयाविक्रिया॥
तो।विद्वान्जानन्नपिश्रीमदविक्रियांतस्यतां।अहोअतीतकर्मत्रहोअसाधुकृतंयस्मात्तदभ्रबुद्धिनाअल्पमतिनामयाकात्कृतःतिरस्कृतः॥११॥

॥ दहोन्नृतायदिकेस्मिदे॥सस्तपछोराच॥

सा०भ० स्तथश्चहेलार्येतियोर्वशमाहामन्तेपति।महानितियेवमेकादशन्नपश्चरुद्रश्चपार्षदाः।शेतादयःअष्टौअन्नश्चांजाताः॥२१॥अंगिरसःसुधासतीहेलार्यंतियो
२३ वेशमाहाइषिजायतेरिति।कृशानामपत्नीपितॄन्वत्रवेरकरोत्॥अथसतीचअथर्वांगिरसंनाममवेदा॥२८॥कृशाश्वाश्चार्चिषिधिषणोतिहेलार्यंतियोर्वं

पुत्रत्वेकरोत्२

सरूपासूतभूतंस्वान्रुद्रांश्चकोटिशः।रैवतोजोभवोभीमोवामउग्रोवृषाकपिः॥२७॥अजैकपादहिर्बुध्न्योबहुरूपोम
आता:२ हानिति।रुद्रस्यपार्षदाश्चान्येघोराभूतविनायकाः॥२८॥प्रजापतेरंगिरसःस्वधापत्नीपितॄनथ।अथर्वांगिरसंवेदंपुत्र
त्वेचाकरोत्सती॥२९॥कृशाश्वोर्चिषिभार्यायांधूम्रकेशमजीजनत्।धिषणायांवेदशिरोदेवलंवयुनंमनुं॥३०॥तार्क्ष्य
स्यविनताकद्रूःपतंगीयामिनीतिच।पतंग्यसूतपतगान्यामिनीशलभानथ॥३१॥सुपर्णासूतगरुडंसाक्षाद्यज्ञेशवाह चंद्रः
गरुडं नंसूर्यसूतमनूरुंचकद्रूर्नागाननेकशः॥३२॥कृत्तिकादीनिनक्षत्राणीन्दोःपत्न्यस्तुभारत।दक्षशापात्सोनपत्यस्तासु रुद्रेकादिकु५
क्षयरोगपीडितः यक्ष्मग्रहार्दितः॥३३॥पुनःप्रसाद्यतंसोमःकलालेभेक्षयेदिताः।शृणुनामानिलोकानांमातॄणांशंकराणिच॥३४॥अ
थकश्यपपत्नीनांयत्प्रसूतमिदंजगत्।अदितिर्दितिर्दनुःकाष्ठाअरिष्टासुरसाइला॥३५॥मुनिःक्रोधवशाताम्रासुरभिः
तंदक्षंप्रसन्नीकृत्य२ खंडिताः।केवलंखंडनेर सरमातिमिः॥ ॥

शमाह।कृशाश्वइति।धूम्रपत्नीविनता।अनूरुंअरुणोरोहिण्यामेव।प्रेमातिशयेनाथ्यासात्उपेक्षणान्नोपितृदक्षशापात्क्षयरूप्यहार्दितःक्ष राम
यरोगपीडितः।मत्रतान्नपत्यो।पुनःतंदक्षंप्रसाद्यकेवलंकलाएवलेभेनतुपत्यानि।कथंभूताः।क्षयेक्षयपक्षेदिताःखंडिताः।सती।पाठांतरे २३
क्षयेमतिपुनरेपिताःनैववर्द्धिताः।सती॥ ॥

तत्सुतः साध्या नाम्नां सुतः श्रवसोर्वशिष्ठस्य यस्य देवो निर्दिष्टः ॥ ७ ॥ मेमत्तं । प्राण इति प्रतिर्न्नाम पत्नीं तस्याहर्षादयः पुत्राः । सह आयुश्च पुरोजवश्च पुत्रौ ।
अरः पुत्राः । स्कंदश्च कृत्तिकासुतो मे ऽनुत्र सामानुर इति अभिषिक्तरिति प्रसिद्धः । तत स्कंदात् विशाखाद्या आकृती पतिः शिल्पाचार्य्यः । ततो विश्वकर्म्म

विश्वेदेवास्तु विश्वाया अप्रजांस्तान्प्रचक्षते साध्यो गणश्च साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥ मरुत्वांश्च जयंतश्च मरुत्वत्यां बभू-
वतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ॥ ८ ॥ मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं ॥
॥ ९ ॥ संकल्पायास्तु संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥ द्रोणः प्राणो ध्रुवोऽर्कोऽग्नि-
र्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवं ॥ ध्रुवस्य
अभिपत्नी २ भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकाद-
यः ॥ १३ ॥ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कुला ॥ १४ ॥ वास्तोरांगिरसीपुत्रो वि- दिवसः १
श्वकर्म्माकृतीपतिः ॥ ततो मनुश्चाक्षुषोऽभूत् विश्वे साध्या मनोः सुताः ॥ १५ ॥ विभावसोरसूतोषा व्युष्टं रोचिषमातपं पंचयामो आतपात्जातं पुत्रः १
ऽथ भूतानि येन जाग्रति कर्म्मसु ॥ १६ ॥ ॥ सुतत्रयं
दिवसेन १ आतः २

पाश्चात्तु उषसो मनुगमीश्च उष्मानार्य्या ॥ अथ आतपात् पंचयामो दिवसो जातः अत एव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् ॥ १६ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुःकृतमत्त१ नारदः२ साधुवादः२ कृतवानसि१

भा०ष० तैष्याधितर्वोलडंलविषात्तेवेवाहाः हेतुंउक्ताततनेमतानन्छेदकं यद्यस्मात्त्रतडुंभ्राणांसानभ्रंशंअथवूरत्तत्तस्मात्तवलोकेभ्रमतःपदंह्याननंनलवेदितिम
२२ डुम्लेनशार्थ्यः।वाढंतथेतितीकृतवान्। ईश्वरेपिउतिशसूमम्सर्थोपि तितिक्षेतमहेतेतियतएतावानेव॥४५॥ ॥षष्ठेपंचमः॥ ॥षष्ठेदक्षेणसृष्टाया
काश्यपंस्त्र्यःप्रकीर्तिताः पृथग्वंशायतोजातोविश्वरूपोदितेःसुताः।नारदात्तत्रशापंनाशमाशकमानोऽहितिद्धर्जनयामास।कायकश्यपायद्विषट्

हे मूढ तन्तुच्छेदन१ पुनःअम्नु भिन्नधीः परैः ३ स्थानं१ कस्मात्४ तद्वाक्यं१

तंतुकृन्तन यन्नस्त्वमभद्रमचरःपुनः।तस्माल्लोकेषु तेमूढनभवेद्भ्रमतःपदं॥४३॥श्रीशुकउवाच॥ ॥प्रतिजग्राहतद्बाढंनारदःसा
धुसंमतः।एतावान्साधुवादोहि तितिक्षेतेश्वरःस्वयं॥४४॥ ॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेपंचमोध्यायः॥ ॥श्रीशुक
उवाच॥ ॥ततःप्राचेतसोसिक्न्यामनुनीतःस्वयंभुवा।षष्टिंसंजनयामासदुहितॄःपितृवत्सलाः॥१॥दशधर्मायकायेंदोर्द्विष
ट्त्रिनवदत्तवान्।भूतांगिरःकृशाश्वेभ्योद्वेद्वेतार्क्ष्यायचापराः॥२॥नामधेयान्यमूषांत्वंसापत्यानांचमेशृणु।यासांप्रसूतिप्रसवै
र्लोकाआपूरितास्त्रयः॥३॥भानुर्लंबाककुद्यामिर्विश्वासाध्यामरुत्वती।वसुर्मुहूर्तासंकल्पाधर्मपत्न्यःसुतान्शृणु॥४॥भा
नोस्तुदेवऋषभइंद्रसेनस्ततोनृप।विद्योतआसील्लंबायास्ततश्चस्तनयित्नवः॥५॥ककुदःसंकटस्तस्यकीकटस्तनयोयतः।भुवो
दुर्गदेवाः१ दुर्गाणिजामेयःस्वर्गोनंदिस्ततोऽभवत्॥६॥ ॥

कश्यपाय२ पुत्रपौत्रादिभिः४ कीकटात्१ स्वर्गात्१

द्विगुणाःषट्द्वादशयामन्ताःत्रयोदशेतार्थःसोइंदोःसोमायत्रिनवसप्तविंशतिं।ताक्ष्यीयनामांतरंकश्यपायकश्यपायैवअपराःअवशिष्टाश्चतस्रः।सापत्या राम
नांअपत्यसहितानांमेमत्तःशृणु।प्रसूतिप्रसवैःपुत्रपौत्रादिभिः।ततोदेवऋषभजातः।यतःकीकटाद्भुवोदुर्गाणिदुर्गाभिमानिनोदेवाः।जामेयःजाम्याःपु २२
त्रःस्वर्गनंदिः॥६॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वैराग्यादुपशमः । उपशमात्स्नेहपाशछिदेव ४

बालानां मतिः पुत्रादि विषयेषु लिप्यतीति तथा एवं निरंकुशोक्रोशः । निर्घृण हे हरे यशोनाशकाः संतताः पार्षदानां मध्ये कथं वसामि ॥ ३७ ॥ निर्लज्जत्व
मेवाह । ननु त्वया स्पष्टे लाभवतः सर्वेषु तानुग्रहपरवशात्वं त्वत्पृष्ठे विशिष्टकर्तृत्वं कथं न लज्जां समगतिलावः ॥ ३८ ॥ ननु वैराग्यादुपशमः उपश
मात्स्नेहपाशच्छेदनं भवति । न च विरक्तः श्रेष्ठ ... तथा पाकरसाभावशकः । यदहे हरे वविरजे न दहरे वपुश्च जेत्रात् । यदि वैतत्र स्थावसुवर्यादेव
पश्चेदित्या दिश्रुतेः । अतो वैराग्योपदेशे न तेषां मया उग्रहण वक्तुं शक्ति वेत्त्वत्राह । नेति । यद्यपि त्वमेवं मध्ये तथापि स्पष्टं केवलिनो ज्ञानं विना

एवं त्वं निरंकुशो क्रोशो बालानां मतिः लिड्डे । पार्षदमध्ये वसामि यशोहानि रयत्रपः ॥ ३७ ॥ ननु लाभवतां नित्यं भूतानुग्रहकातरः ॥
अतो त्वं मोहदष्टे वैदेहं कारमवैरिणां ॥ ३८ ॥ नेदं मां विरागः श्रोसत्यः केवलिना ष्टमध्ये मे यद्युपशमं स्नेहपाशनिकृन्तनं ॥ ४०
नानुष्ठयन जानाति पमाक्षिषयती ज्ञातो । निर्विद्येत सर्वोर्थं तस्मान्नेतर्थो लिन्न वीक्ष्य वै सौ ॥ ४१ ॥ यन्न त्वं कर्तुमेधातां साधूनां स्पृहमे
विनां कृतवान् मिड्डमर्षि विशिष्टं तव मर्षितां ॥ ४२ ॥ ॥

वैराग्यादुपशमः ॥ ३ उपशमात्स्नेहपाशच्छिदेव ३ । ४ । १ ... ड:मम ... मज्ञत्रवमश्राप्य रसौदो ७१

विरक्तः १ ... वैशिष्ट्यं कर्तुमजानतो १

वस्तुतत्वे विशात्वया इदं मतिर्बालनेकृते पर्वमां विरागो नैव त्या ज्ञानत्व विरागं विनोपशमः न वते न विना स्नेहपाशनिकृन्तनमित्यर्थः ॥ ४० ॥ इदं
विरागो न स्रो दित्यत्र हेतुमाह । नानुष्ठयं अनेनुष्ठय विषयाणां तीज्ञातो ड:खहेतु त्वं न जानासि । तस्माद्विषयात्तुच्छत्वेन तीज्ञात्वज्ञानात् । अतस्तु
विरागो नस्रो दित्यत्र हेतुमाहा नानुष्ठय अनेनुष्ठय विषयाणां ... यास्माकं मोप्रियमेव कृतो ॥ ४१ ॥ तथापि वयं न कर्मण्याहा यदिति । कर्म्मणां कर्म्ममर्यादानां कर्तुमेधानामिति पार्वे विशिष्टं कर्तुमजान
तामित्यर्थः । ड:मम हेय त्वं कृतवानमित न्मर्षितं सोढं ॥ ४२ ॥ ॥

सा०म०
२२

हे दाक्षायण्याः संस्थापिते त्वाद्दिष्ट्वा नरस्थाद् दपि आह। निगमं च उपदेशं अविज्ञात अवलोकयता। प्रयाणं प्रकृष्टं गमनं। भ्रातृमेव वंकायष्टि। मरुद्भिर्वातैर् इव त्वमर्थैः दे
वैः। अमोघं दर्शनं यस्य। हे मारिष आर्य सध्रीचीनं सम्यक् ईचीनं प्रतीचीनं प्रत्यग्वृत्तिलक्ष्ये अनुपथं अनुगां पंथानं। पश्चिमा यामिनीः गता रात्रय इव। भ्रातॄणां प
रमहं शृणोमि अनुपथं त्वं दर्शनोपि आयशो विरक्तः। आदितितदभयहार्थं देवर्षिं शतमार्गं गतमवलोकयत उपलभ्य दक्ष आह। मा योनिर्लिंगं वै मोय श्रीतेन त्वया नोः स्म
दीयानां मनसा नामनोमा कृष्णकारिता। तदेवाह। मा दृष्टिं नां प्रथमं प्रदत्तानां भिक्षोर्योग्यमार्गः प्रदर्शितः। न तमसंख्यासितो मार्गः साकारैर्मोक्षहेतुर्वा सत्या

दृष्ट्वा याताः संस्थाः कृतां यदतो निगमं ममौ अविज्ञातोऽनुपदवी भ्रातॄणां भ्रातृवत्सलाः॥३०॥ भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित्।
सपुण्यबन्धुः पुरुषो मरुद्भिः सहमोदते॥३१॥ एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः। तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष॥३२॥ स
ध्रीचीनं प्रतीचीनं परस्यानुपथं गताः। नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव॥३३॥ एतस्मिन्काल उत्पातान् बहून् पश्यन्प्रजापतिः।
पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत्॥३४॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्च्छितः। देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः॥३५॥
दक्ष उवाच॥ ॥ अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया। असाध्वकार्य्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः॥३६॥ ऋणैस्त्रिभिरमुक्ताना
ममीमांसितकर्म्मणां। विघातः श्रेयसः पाप लोकयोरुभयोः कृतः॥३७॥ ॥

ऋणानि त्रयाणां ऋणानां विनाश महानर्थ एव त्वया हि ऋणैरिति। जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एष
वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासीति श्रुतेः। ऋणैरमुक्तानां अमीमांसितानि विचारितानि कर्म्माणि येषां तेषां बालानां विमोक्षो नाशितः उत्तरकालभावि
वासन्द्योत्पादनयज्ञानुष्ठानयोर नादेन पितृदेवर्षिविष्टक्रिया नाशिता। अतः हे पाप विषयत्यागात् इह लोके श्रेयसो विघातः कृतः मोक्षानाविर्भावात्
परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः। तथा च मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥३७॥ ॥

राम
२२

